SAIŚIRĪYA-ŚIKṢĀ

edited by

TARAPADA CHOWDHURY, M. A., PH. D.

This edition of the Śaiśirīya-Śikṣā is based on a Devanāgara copy of a Kerala ms. deposited in the Adyar Library, Madras. The transcript was very kindly lent to me by Prof. Dr. Raghu Vira. The original ms. is reported to be neatly and carefully written, and not very old in appearance, and to contain no colophon giving the name of the copyist or the date or place of writing.

The Śaiśirīya-Śikṣā is concerned with the Śaiśirīya-śākhā of the RV. Śaunaka's Ṛkprātiśākhya, too, professes to deal with the same śākhā (see M. D. Śāstrī's ed., Vargadvayavṛtti v. 7). As in the latter, nearly all the instances quoted could be traced to the printed edition of the RV. References thereto have been supplied as far as possible. I have also taken the liberty to introduce accent marks in the citations and the symbol of the elided a where necessary,—both of which are absent in the original ms.—, to separate the examples without altering the sandhi forms in which they appear, and to vary the position of the double stroke, marking the conclusion of a verse according to sense.

ABBREVIATIONS

Am. = Amareśa-Śikṣā
LŚ = Lomaśī-Śikṣā
MŚ = Māṇḍūkī-Śikṣā
Nār. = Nāradīya-Śikṣā
Pār. = Pārāśarī-Śikṣā
PŚ = Pāṇinīya-Śikṣā
RPr. = Ṛkprātiśākhya ed. M. D. Śāstrī
Svar. = Svarāṅkuśa
YŚ = Yājñavalkya-Śikṣā

All the Śikṣās, except the Māṇḍūkī-Śikṣā, have been quoted from the Śikṣāsaṃgraha, published in the Benares Sanskrit Series. The Māṇḍūkī-Śikṣā is generally quoted from Bhagavaddatta's edition.

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ॥

ओं गजाननाय श्रीशाय सर्वविघ्नप्रणाशिने ।
नमो गणेशरूपाय विष्णवे दशबाहवे ॥[2]
जगत्संभूतिसंरक्षासंहारैकविनोदिने ।
नमो भगवते तस्मै चिदानन्दाय विष्णवे ॥
मुद्गलो गालवो गार्ग्यः शाकल्यः शैशिरस्तथा ।
पञ्चैते शौनकाः शिष्याः शाखाभेदप्रवर्तकाः ॥[3]
शैशिरस्य तु शिष्यस्य शाकटायन एव च ॥
सर्वज्ञं सर्वकर्तारमाचार्यं तु प्रणम्य च ।
शैशिरो ऽहं प्रवक्ष्यामि शाखाया लक्षणं विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः ।
प्राकृते संस्कृते वापि स्वयं प्रोक्ताः स्वयंभुवा ॥[4]
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारस्तु यमाः स्मृताः ॥[5]
अनुस्वारो विसर्गश्च ळकारश्च तथैव च ।

1 Ms. खर्तृनि-.

2 For the conception cp. Brahmavaivartapurāṇa, quoted in Śabdakalpadruma s.v. gaṇeśa.

3 Cp. Viṣṇumitra in Vargadvayavṛtti 7 (RPr.) मुद्गलो गोखुलो वात्स्यः शरीरः शिशिरस्तथा । पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः ॥ and Viṣṇupurāṇa quoted in Śabdakalpadruma s. v veda: मुद्गलो गोखलुश्चैव वात्स्यः शालीय एव च। शैशिरः पञ्चमश्चासीन्मैत्रेयः सुमहामतिः ॥

4 Ll. 10-11 = PS 3 with v. l. शंभुमते for संभवतो.

5 Ll. 12-13 = PŚ 4.

दुस्पृष्टश्चेति विज्ञेयो नासिक्यं रङ्गमुच्यते ॥[1]
उच्चारणविशेषेणाक्षराश्रयमुच्यते ॥
द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।
अकारादिः स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ॥
द्विविधश्च स्वरो ज्ञेयो ऽनासिक्यः सानुनासिकः ।[2]
उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा ॥
कादीनां पञ्च वर्गाश्च[3] स्पर्शा इति हि संज्ञिताः ।
दुस्पृष्टश्चेति विज्ञेयो डढयोः स्वरमध्ययोः ॥[4]
वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञिताः ।
हकारवर्ज्याश्चाघोषाः शिष्टं घोषवदुच्यते ॥
नासिक्याः पञ्चमा वर्णा अनुस्वारस्तथैव च ।
चत्वारस्तु यमाः प्रोक्ता अव्यक्ताः सानुनासिकाः ॥
चतस्रो याद्यो ऽन्तस्था नासिक्या अप्यरेफिकाः ।
ऊष्माणः शादयश्चैव चत्वार इति कीर्तिताः ॥
जिह्वामूलीय इत्युक्त उपध्मानीय एव च ।[6]
कपाश्रितोष्मजातौ च विसर्गस्य च संभवौ[7] ॥
ह्रस्वो[8] दीर्घः प्लुत इति स्वराः कालेन संज्ञिताः ।
संध्यक्षराणां कालश्च दीर्घः प्लुतो न मात्रिकः ॥
उच्चारणविशेषेणा[अ]क्षराश्रयमुच्यते ॥[9]
व्यञ्जनं त्वर्धमात्रं स्यात् स्वरभक्तिस्तथैव च ।
संयोगे पादमात्रा स्यात् स्वरभक्तिः प्रकीर्त्यते ॥[10]
ह्रस्वात् परस्त्वनुस्वारस्त्रिपादः परिकीर्तितः ।

1 Ll. 14–15 = PŚ 5, except b: ᳵकᳶपौ चापि पराश्रितौ, and d: ऌकारः प्लुत एव च ।

2 Ms. द्विविधाश्च स्वरा ज्ञेया नासिक्याः सानुनासिकाः ।

3 Ms. वर्णाश्च.

4 Am. 15cd: द्विस्पृष्टता च विज्ञेया डढयोः स्वरमध्ययोः which would be a better reading here.

5 Ms. श्चा॰

6 Ms इत्युक्ता उपध्मानीयमेव च.

7 Ms. संभवाः.

8 Ms. ह्रस्व.

9 The reading appears to be faulty; should it be उच्चारणविशेषेणाक्षरमाश्रय उच्यते ?

10 Cp. ṚPr. 1. 33–35.

स च ह्रस्वस्त्रिपादः स्याद् द्वावेतौ सममात्रिकौ ॥
दीर्घात् परस्त्वनुस्वारः पादमात्रः प्रकीर्तितः ।
स च दीर्घः सपादः स्याद् वर्णकालो निगद्यते ॥[1]
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥[2]
अकुहाः कण्ठजाः प्रोक्ता उपध्मानीय ओष्ठजः ।
उपू[3] ओष्ठ्यौ विजानीयाद्वो[4] दन्त्योष्ठ्यस्तथैव च ।
एऐ तु कण्ठतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ ॥
स्पर्शानां करणं स्पृष्टमन्तस्थास्वीषदुच्यते ।
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ॥
संवृतं चेत्यकारस्य सर्ववर्णो निगद्यते ।
उच्चारणविशेषेणा[त्रा]क्षराश्रयमुच्यते ॥[5]
अनुस्वारे विवृत्त्यन्ते विरामे चाक्षरद्वये ।
ओवर्णे च उवर्णे च पवर्गे च पृथक् पृथक् ॥
ओ औ उवर्ण इत्येषामनुस्वारपवर्गयोः ।
विरामे च विवृत्तौ च मध्ये च व्यञ्जनद्वये ।
द्विरोष्ठौ तु विगृह्णीयाद्वकारे त्वधरं तथा ॥[6]
सुऊतयो (8.47.1-18) भ्रातुः पुत्रान् (10.55.1) धेनुं[7] सोमः (1.91.20) ।
प्र सुष्टुतिः (5.42.14) यन्मयोभु (5.42.2) उदीरय पुपुष्वान्[8](10.71.11) ।
मोष्ठवो[9] असमा बभूवुः[10] (10.71.7) श्वो[11] वोचेमही(1.167.10) त्येतादृशं निदर्शनम् ॥
ओ औ उवर्ण इत्येषां व्यञ्जनस्य च संगतौ ।
सकृदोष्ठौ विगृह्णीयान्नान्यश्चेन्मध्यगः स्वरः ॥
द्विषो युयोतु यूयुविर् (5.50.3) इत्येतत्तन्निदर्शनम् ॥

1 Cp. RPr. 13. 32-33.
2 Ll. 40-41 = PŚ 13.
3 Ms. ऊवू.
4 Ms. द्वौ.
5 ? Perhaps it is to be emended to उच्चारणविशेषेणाक्षरमाश्रय उच्यते ।
6 Ll. 49, 53 = PŚ 24, except विवृत्त्यां तु for विवृत्त्यन्ते.
7 Ms. तेनुं.
8 Ms. पुपुष्ट्वान्.
9 The reading is doubtful. Is it मोष्व१ षु (8. 2. 20) ?
10 Ms. असमान् बभुवुर्, but amongst the three occurrences of बभूवुः in RV the above one is the nearest to it.
11 Ms. श्यो.

कतवा यत्र दृश्यन्ते संधिस्थानेषु नित्यशः ।
खवर्गेण नियुक्ताश्च धीरन्तत्रैव कारयेत् ॥[1]
हिङ्कृण्वती[2] (1.164.27) तत्ते भद्रं (1.94.4) गां भजन्त (8.4.21) निदर्शनम् ॥
स्पर्शानां पञ्चमैर्योगे भवन्तीह यमाः स्मृताः ।
अयःपिण्डेन तत्तुल्यं घनबन्धाः प्रकीर्तिताः ॥[3]
सः पलिक्नीर् (5.2.4) अग्निर् । यज्ञं । पत्नीर्[4] । विघ्न ।
दध्मं[5] (5.172.3) आत्मानं । पाप्मा । जगृभ्मा । ऽगृभ्णामित्[6]येतन्निदर्शनम् ॥
स्पर्शास्त्वपञ्चमाश्चैवमन्तस्थाभिश्च संयुताः ।
दारुपिण्डेन तत्तुल्यं श्लथबन्धाः प्रकीर्तिताः ॥[7]
शत्रुं । सख्यम् । अग्रयं । कृच्छ्रं[8] । क्वं । वज्रं । यज्वा । राष्ट्रयाति (6.4.5) ।
स्रायोगिर् (8.1.33) विद्धिर्[9] (?) । मेढ्रं । वाध्र्यश्वे (10.69.5,9,12) ति निदर्शनम् ॥
वकारस्तु नकारेण रेंकारेण च संयुतः[11] ।
श्लथबन्धः स विज्ञेयो दुस्पृष्टश्चात्र चोच्यते ॥
भूरिदाव्नः । एवयाव्नः (2.34.11) प्रातर्याव्णः (1.45.9) दधिक्राव्णः ।
ईळे द्यावापृथिवी (1.112.1) मीळ्हे सप्तिर् (9.106.12) इत्यत्र तु निदर्शनम् ॥
संयोगे शषसाः पूर्वे परं चेदनुनासिकम् ।
ऊर्णापिण्डेन तत्तुल्यं श्लथबन्धाः प्रकीर्तिताः ॥
अश्नोतु । विष्णुर् । घृतस्नू[12] (3.41.9) कार्ष्मेवे[13] (1.116.17) ति निदर्शनम् ॥
परस्परस्तु संयोगः स्पर्शानां संभवेद्यदि ।
तत्पूर्वस्य श्रुतिर्नास्ति विरामे व्यञ्जनस्य च ॥[14]

1 Ll. 60–61 are not very clear. Examples and sense suggest कतभा as the right reading for कतवा.

2 Ms. हिं कृण्वति.

3 Ll. 63–64 = Am. 176b–177b, except ...चत्वारो ये यमाः स्मृताः । अयःपिण्डेन ते तुल्याः....

4 Ms. पत्निर्.

5 Ms. दध्मात्मानं, but only दध्मः, and not दध्म, occurs in RV

6 अगृभ्णाम् does not occur in RV, but अगृभ्णात् and अगृभ्णन् do.

7 Cp. Am. 178c–179b.

8 कृच्छ्रा only in RV.

9 Is it विद्युः (1. 23. 24) ?

10 Ms. ज–.

11 Ms. संयुतौ.

12 Ms. घृतस्नू.

13 Ms. कार्ष्मेव.

14 Cp. RPr. 6. 17–18 and Am. 187. Ll. 78–81 repeated as ll. 251–252 and 255–257 below.

वाग्देवी । विद्कुलाद् । विभ्राड् बृहद् (10.170.1) आरैक् पन्थाम् (1.113.16) । यद् ग्रन्[2] (5.31.7) त्रिष्टुबे गायत्री (10.14.16) अस्माद् । अनुष्टुबिति निदर्शनम् ॥

नकारान्तं पदं पूर्वं यवकारे परे पदे ।
असंयुतं तु विज्ञेयमुभयोर्व्यक्तिरिष्यते ॥[4]
संयुतौ यवकारौ चेद्दकारः परतो यदि ।
संयुतं त्वत्र विज्ञेयं नोभयोर्व्यक्तिरिष्यते ॥[5]
अनुस्वारस्वराद्यस्तु[6] संयोगादिर्द्विरुच्यते ।
ऊष्मा चेत् प्रथमौ[7] ज्ञेयौ लात् स्पर्शौ[8] रपरस्तथा ॥
त्वं [श]श्रद्धाभी (6.26.6) रथं [स्]स्वस्ति । व[ज्]ज्रम् । अ[ग्]ग्रम् ।
आ [त]त्वा रथम् (8.68.1) ।
आ [द्]द्वाभ्याम् (2.18.4) इध्यस्व (?)[10] । वि[ब्]भ्वीस् (1.188.5) सहस[क्]कृत ।
कश[च्]छन्दसां[11] (10.114.9) पश[च्]चात् । सुष् [ट]टुभस् । तिष्[ट]ठन्ति ।
शुल्का (?)[12] । कस [त्]तद् (1.170.1) अस[त्]ता । दिवस[प्]परि ।
शुल्[क]का[र्य][13] । उल् [क्]कामिव (10.68.4) गल्[द्]दया (8.1.20) मर्व[र्य]ति[14]
वर्धन्तान्दितं पुनर्यन्ध पूर्वमैर्थश्च (?)[15] तदत्र तु निदर्शनम् ॥
यद्यूष्मानुपधो[16] युक्तः स चेदन्तस्थया पुनः ।
तस्यैव क्रमणं कार्यं [श्]श्यावा । [स्]स्वाहा । [श्]श्रिये । [ह्]ह्वये ॥[17]
नटाभ्यां से परे मध्ये तकारः संप्रजायते ।[18]

1 Ms. –द्.

2 Ms. यद्ग्रद् (cp. l. 253, 256).

3 Ms. –प्.

4 Cp. RPr. 6. 23.

5 Cp. ll. 119-120 below.

6 Ms. –न्त, cp. RPr. 6. 1.

7 Ms. –मा, cp. Uvaṭa on RPr. 6. 6: ऊष्मणः परेषां प्रथमद्वितीयानामेव द्विर्वचनमिष्यते and Pāṇ. 8. 4. 47: शरः खयः.

8 RPr. 6. 5.

9 RPr. 6. 4.

10 ईर्ध्यस्य is the nearest form in RV. इध्यस्व does not occur.

11 Ms. कच्छन्दसां.

12 This is out of place here and seems to be a mistake.

13 Ms. शुल्का, but शुल्कार्य is the only form used in RV.

14 Ms. मर्वति, which does not occur in RV.

15 वर्धन्तान्दितं etc. hopelessly corrupt.

16 Ms. –ब–.

17 Cp. RPr. 6. 9: वोष्मा संयुक्तो ऽनुपधः.

18 RPr. 4. 17.

नतयोर्ले[1] चवर्गे च सवर्णः स्यात् परस्य तु ॥
त एवादुकहेमश्च वृत्तश्चाकारः श्रूयते ।
आपः क्षिप्तश्च यच्छब्दं प्रथमोच्चारणलक्षणम् (?)[2] ॥
[3]सेसवान्तसन्तस्तूयसे (3.22.1) विराट्तसम्राट् (1.188.5) यस्मिँल्लोके (9.113.7) ।
नृज्ञातैर्[3] (5. 15. 2) इति तल्लोकम् । अस्माच्चेति निदर्शनम् ॥
अनन्त्याः प्रथमा वर्णा घोषसंज्ञे परे स्थिते ।
वर्णा द्वितीयानुच्यन्ते उच्यन्ते वर्णवेदिभिः ॥[4]
द्वयोः पादुकहेमश्च वृत्तश्चाकार श्रूयते ।
आपः क्षिप्तश्च यच्छब्दं द्वितीयोच्चारणलक्षणम् (?) ॥[2]
वृ[ख]षेन्दृ[ख]षे[5] (10. 27. 22) संवथ्सरं (7. 103. 1) ।
त्वान्थसारी[6] (1.134.5) तमफसन्त[7] (1.100.8) च मत्थसरः[8] (9.65.10) ।
मथ्स्यपायी (1.175.1)त्येतत्तु निदर्शनम् ॥
यथासौ मत्तमातङ्गः पदात् पदमवक्रमी ।
एवं पदं पदस्यान्ते दर्शनीयं[10] पृथक् पृथक् ॥
रलौ स्वराद्[11] यत्र पूर्वा ऊष्मसंज्ञे परे स्थिते ।
पूर्वस्वरस्य संभाव्या स्वरभक्तिः प्रकीर्त्यते ॥[12]
अदर्शि । शीर्षा[13] । अग्निर्होता (1.1.5) सस्र्ते[14] (2.25.1) च । न जल्ह्वः[15] (8.61.11) ।
शतवल्शो (3.8.11) ऽर्षा णः[16] (9.61.15) अर्षश्चेतदत्र निदर्शनम् ॥

1 Ms. –र्ले. For line 97 cp. RPr. 4. 8–11.

2 Hopelessly corrupt.

3–3 Ms. ससवान्थसन्थस्तूयसे विराट् सम्राट् स्मिन्लोकेन्तज्ञातैरिति.

4 Read अनन्त्याः प्रथमा वर्णा ऊष्मसंज्ञे परे स्थिते । वर्णा द्वितीया उच्यन्ते उच्यते वर्णवेदिभिः ॥ ? Cp. RPr. 6. 54: ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजम्.

5 Ms. वृषेवृषे.

6 Ms. त्वान्थसारि.

7 Ms. तमस्सन्त.

8 Ms. चमत्सरं.

9 Ms. मत्स्य–

10 Ms. पदपदस्यान्तं दर्शयन्तं; cp. YŚ: 197: यथा सुमत्तनागेन्द्रः पदात्पादं निधापयेत् । एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक् ॥

11 Ms. ऋलस्वरा, which can only be a mistake. Cp. RPr. 6. 46: रेफात्स्वरोपहिताद्व्यञ्जनोदयादृकारवर्णा स्वरभक्तिरुत्तरा, and YŚ 102, Am. 53.

12 Cp. RPr. 1. 32.

13 Ms. शीषा.

14 Ms. ससृते.

15 Ms. जल्हवः.

16 Ms. षांण.

व्यञ्जनान्तेषु युक्तेषु सैव स्यात् पादमात्रिका ।[1]
शीर्ष्णः शीर्ष्णः (7.66.15) प्रसस्राणः[2] (5.44.3) तर्ह्येवैतन्निदर्शनम् ॥
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत् ।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥[4]
यकाररेफावित्येतावृकारेण च संयुतौ ।
ओष्ठौ तत्र न कम्प्येते क्षिप्रमेतत् प्रचक्षते ॥[5]
प्र कृतान्यृजीषिणः (8.32.1) वज्र्यृचीषमः[6] (10.22.2) शम्यृक्वाणः (1.87.5) ।
निर्ऋथन् (7.107.14) निर्ऋतेश्चापि निदर्शनमितीदृशम् ॥
विसर्जनीयस्य यदा कपयोः परतः स्थितिः ।
न संहितायां भवत ऊष्मजातौ परिग्रहे ॥[7]
ज्योतिष्कृद् (1.50.4) यातं छर्दिष्पाः (8.9.11) इममञ्जस्पामुभये[8] (10.92.2) ।
हविष्कृतं । पथस्पथ (6.46.8) इत्यत्र तु निदर्शनम् ॥
नीचैः स्वरोऽनुदात्तः स्यादुच्चैश्चोदात्त उच्यते ।
स्वरितं तत्समाहारस्तदैक्यं प्रचयः स्मृतः ॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उच्यते ।
स्वरितः कर्णमूलीयः सर्वस्मिन् प्रचयस्तथा ॥[9]
इमं मे गङ्गे यमुने सरस्वति[10] (10.75.5) निदर्शनम् ॥
उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ।
लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥
शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते ।
श्यामं तु स्वरितं विद्यादग्निरुच्चस्य देवता ॥
नीचे सोमं विजानीयात् स्वरिते सविता तथा ।
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमुच्यते ॥
वैश्यं तु स्वरितं विद्यादुदात्तं तु भरद्वसुः ।

1 Cp. RPr. 6. 49.
2 Ms. प्रसस्राणः.
3 Ms. तर्ह्ये–. RV has तर्हि only once at 10. 129. 2, but that is not followed by एव.
4 Ll. 117–118 repeated below as ll. 186–187.
5 Cp. ll. 84–85 above.
6 Ms. –म.
7 Cp. RPr. 4. 38.
8 Ms. छर्दिष्वापिममञ्ज स्वामुभये.
9 Ll. 129–130 = PŚ 48 with v. l., b... उदाहृतः, d सर्वस्थे प्रचयस्तथा.
10 Ms. –ती.

नीचं गौतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ॥
विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमुच्यते ।
जागतं स्वरितं विद्याद्देतदेव नियोगतः ॥[1]
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत् ।[2]
द्विगुणं वर्णकालाच्च पादः कम्पार्थ इष्यते ॥
अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत् ।
पुनर्निहतमागच्छेद्[3] एष कम्पविधिः स्मृतः ॥

क १ वो ऽश्वा (5.61.2) युजानो ३ ऽस्माभिस् (6.34.2) त्वां ही ३ न्द्रे (6.33.2)ति निदर्शनम् ॥

सरङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥[4]
उदात्तः पूर्वभागस्तु परभागो निहन्यते ।
उदात्तकम्प इत्युक्तः कुत्रचिच्चापि दृश्यते ॥

शची ३ पतिन् (1.106.6) तनू ३ नपाद् (3.29.11) रथानाम्[5] (10.78.4) निदर्शनम् ॥

क्रमकाले रथानाम्न संहितावन्न कम्पयेत् ।
नीचस्वरितमेवात्र एष कम्पविधिः स्मृतः ॥
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः ।
नाभ्याहन्यान्न निर्हन्यान्न गायेन्न च कम्पयेत् ॥
यथैवोच्चारयेद्वर्णांस्तथैवैतान् समापयेत् ।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् ॥
समेमुच्चारयेद्वर्णान् हस्तेन च मुखेन च ।
स्वरश्चैव तु हस्तश्च द्वयं तु युगपद् भवेत् ॥
हस्ताद् भ्रष्टः स्वराद् भ्रष्टो न वेदफलमश्नुते ॥
न करालो न लम्बोष्ठो नाव्यक्तोनानुनासिकः ।
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥
प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ ।

1 Ll. 132-141 = YŚ 1-5 with minor differences, except भारद्वाजमुदात्तकम् for उदात्तं तु भरद्वजः in line 138.

2 L. 142 = PŚ 30ab.

3 Ms. -त्.

4 L. 147 = PŚ 30cd, but where is the रङ्ग ?

5 रथानाम्न contains no कम्प, but न ये ३ राः which immediately follows has it.

प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति ॥[१]
यथा व्याघ्री हरेत् पुत्रान् दंष्ट्राभिर्न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥[२]
संहिता नयते[3] सूर्यं पदानि शशिनः पदम् ।
क्रमो विनयते सूर्यं यत्तत्[४] पदमनोमयम् ॥[६]
हस्तहीनं तु यो ऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥[७]
हस्तेनाधीयमानश्च स्वरवर्णान् प्रयोजयेत् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोकं समश्नुते ॥[८]
यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् ।
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥[९]
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।
शेषास्तु स्वरिता ज्ञेयाः षड्ंजमध्यमपञ्चमाः ॥[११]
उदात्तमाख्याति वृषो ऽङ्गुलीनां
प्रदेशिनीमूलनि[वि]ष्टमूर्धा ।
अन्त्ये च मध्ये च स्वरितं धृतञ्च
कनिष्ठिकायामनुदात्तमेव ॥[१२]
आकाशस्था यथा विद्युत् स्फटिके मणिसूत्रवत् ।
एष छेदो विवृत्तीनां यथामात्रविचक्षणः(?) ॥[१३]

1 Ll. 153-163 = YŚ 21-26 with minor differences, of which is to be noted यथादावुच्चरेद् वर्णान् for यथैवोच्चारयेद् वर्णान् in line 155

2 Ll. 164-165 = YŚ 195, PŚ 25.

3 Ms. —ने.

4 Ms. —त्तं.

5 Ms. —नो—.

6 Ll. 166-167 = YŚ 30d-31b the latter reading क्रमो ऽपि नयते सूक्ष्मं यत्तत्पदमनामयम् ।

7 Ll. 168-169 = PŚ 54, YŚ 40.

8 Ll. 170-171 = YŚ 44 with प्रयुञ्जतः for प्रयोजयेत् and अवाप्नुयात् for समश्नुते. Cp. PŚ 55.

9 Ll. 172-173 = YŚ 46, NŚ 3. 1 which has धार्यते for तिष्ठति in d.

10 Ms. —ड्—.

11 Ll. 174-175 = YŚ 7. Cp. PŚ 12.

12 Ll. 176-179 = PŚ 43, with उपान्तमध्ये for अन्त्ये च मध्ये च in c.

13 Ll. 180-181 = YŚ 93, with स्फुटिता for स्फटिके and यथा बालेषु कर्तरि in d. Cp. also MŚ 9 6 : अभ्रमध्ये यथा विद्युद्

वत्सानुसृतार्धमात्रा तथा वत्सानुसारिणी ।
पाकवत्युभयोर्ह्रस्वा दीर्घमध्या पिपीलिका ॥[1]
प्र व पक्षौ (2.29.5) ऽर्वाञ्चो अद्य (2.29.6) रथं हिरण्यप्रउगम् (1.35.5) ।
धृतव्रता आदित्याश् (2.29.1) चैतत्तत्र निदर्शनम् ॥
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत् ।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥[2]
न च स्वरति पूर्वाङ्गे नापराङ्गे कथं चन ।
न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥[3]
पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत् परम् ।
उभयार्धार्धसंयोगे स्वारं कुर्याद् विचक्षणः ॥[4]
दुर्बलस्य यथा राष्ट्रं हरेत्त[द्] बलवान् नृपः ।
दुर्बलं व्यञ्जनं तद्वद्धरेत् बलवान् स्वरः ॥[5]
मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम् ।
तस्यान्ततो ऽर्धमात्रां(?)वै मात्राधिक्यं(?)तथैव सा ॥[6]
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥[8]
यद्योभावप्रसंधानमुकारादि परं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद् व्यक्तमूष्मणः ॥[10]
स्वराः कम्पाश्च रङ्गाश्च ये यत्कालाः स्वभावतः ।
वर्धन्ते प्रोच्यमानास्ते क्षिप्रयत्ने[11] विवक्षदि ॥

दृश्यते मणिसूत्रवत् ।...यथा बालेषु कर्तरी ॥, quoted (without reference) by Uvaṭa on RPr. 14. 62.

1 Cp. YŚ 95–97.

2 The same as ll. 117–118 above, = YŚ 103.

3 Ll. 188–189 = YŚ 105, with नेतत्स्वरितपूर्वाङ्गे for a, and LŚ 3. 1 with नैतत्स्वरतिपूर्वांगे for a, and न व्यञ्जने न मात्रायां कथं योगो विधीयते for cd.

4 Ll. 190–191 = YŚ 106, with उभयोरर्धसंयोगे for c. Cp. LŚ 3. 2: स्वरस्यैव तु पूर्वार्धे व्यञ्जनार्धार्धपश्चिमे । तयोरर्धार्धसंयोगे स्वरं कुर्याद् विचक्षणः ॥

5 Cf. YŚ 111, Nār. 2. 4.4.

6 Ll. 194–195 = YŚ 115, which has for cd तस्यादितो ऽर्धमात्रा स्याच्छेषं तु परतो भवेत्.

7 Ms. –पा–.

8 Ll. 196–197 = PŚ 14, YŚ 143.

9 Ms. –नं मु–.

10 Ll. 198–199 = PŚ 15, YŚ 143.

11 Ms. –न्त्रे.

११

यकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः ।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः ॥[1]
पादादौ च पदादौ च संयोगावग्रहेषु च ।
जः[2] शब्द इति विज्ञेयो अन्यत्र य[3] इति स्मृतः ॥[4]
एकमक्षरमेतच्च.........पदान्तवत् ॥
माधुर्यं च न चाव्यक्तं व्यक्तं च न च पिण्डयेत् ।
सनाथस्येव देशस्य न वर्णास्संकरं गताः ॥[7]
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञो ऽल्पकण्ठश्च षडेते पाठकाधमाः ॥[8]
माधुर्यमक्षरव्यक्तिं पदव्यक्तं तु सुस्वरम् ।
धैर्यं लघुसमायुक्तं षडेते पाठके गुणाः ॥[10]
राक्षे(?)ति प्रथमो ज्ञेयः क्ला(?) इत्यपरो भवेत् ।
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ॥[11]
प्रथमोत्तमवर्गीये वर्ग्यान्त्यैस्सह संगते ।
नासिक्यं गुरुमुच्चार्यं यमस्थानगतं वदेत् ॥
नादस्तु श्रूयते घोषाद्विरामाद् द्वित्वतस्तथा ।
अनासिक्यो ऽथ नासिक्यो जायते वर्णरूपतः ॥[12]

दध्यङ् ह (1.116.12) परमे व्योमन् (10.129.7) वीर्यं चेति निदर्शनम् ॥

1 Ll. 202–203 = YŚ 156 with यवर्णः for यकारः.

2 Ms. प–.

3,4 Ms. न.

5 Ll. 204–205 = YŚ 150 with यो ऽन्यः स य इति स्मृतः for d.

6 Ms. –ग–.

7 Ll. 207–208 = YŚ 195 with मधुरं चापि नाव्यक्तं सुव्यक्तं न च पीडितम् for ab.

8 Ms. –काः.

9 Ll. 209–210 = PŚ 32, YŚ 196.

10 Ll. 211–212 = PŚ 33, YŚ 199, which have for ab···व्यक्तिः पदच्छेदस्तु सुस्वरः and for c PŚ धैर्यं लयसमर्थं च, YŚ धैर्यं गुरुलघुत्वं च.

11 Between ll. 213 and 214 a few lines appear to have been dropped. Cp. YŚ 212–214:
रुक्मेति प्रथमो ज्ञेयः
सक्थ्ना इत्यपरो भवेत् ।
ञ्चिद्ग्मा ते तु तृतीयश्च
जम्भे दध्मश्चतुर्थकः ॥
अपञ्चमैश्चैकपदे संयुक्तं पञ्चमात् परम् ।
उत्पद्यते यमस्तत्र सोऽन्नं पूर्वाक्षरस्य हि ॥
पञ्चमाः शषसैर्युक्ता अन्तस्थैर्वापि संयुताः ।
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ॥

12 Cp. RPr. 6. 39–42.

नकारस्य पदान्तस्य स्वरे रेफो विधीयते ।
लोपस्त्वाकारपूर्वस्य सशौ तु तचयोः परे[1](?) ॥
सखीँर्यान् (4.35.7) उत् पर्णीँ॑र्हतम्[2] (1.184.2) ॥
तादृशं रञ्जयेदङ्गं सर्वं नासिक्यसंगतम् ।
लाक्षारक्तं यथा तोयं नकाराङ्गस्वरं तथा ।
सर्वरङ्गं विजानीया[द्] बन्धूँरिति[3] निदर्शनम् ॥[4]
हृदयादुत्थितं रङ्गं कांस्येन समसुस्वरम् ।
मात्रिकं च द्विमात्रं च जघन्वाँ इति निदर्शनम्[5] ॥
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिधीयते(?) ।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया (8.77.3)[6] ॥
लुप्ते[7] नकारे यत् स्वरं रञ्जन्ति शौनकादयः ।
आदिरङ्गमिति[8] प्रोक्तं न त्वा भीरिव विन्दतीँ३[9] (10.146.1) ॥
सप्त स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम् ।
जात्यः क्षैप्रो ऽभिनिहितस्तैरोव्यञ्जन एव च ॥[10]
जात्यः स्वरः सजात्येन क्षुध्यद्भ्ये (8.23.14) क्षैप्र उच्यते ।
ते ऽवर्धन्ता(1.85.7)भिनिहितस्तैरोव्यञ्जन ऊतये ॥
तिरोविरामो विष्कभिते (6.70.1) प्रश्लिष्टो हीन्द्र गिर्वणः (8.98.7) ।
पादवृत्तः क ईं वेद स्वरास्सप्तैवमादयः ॥[11]
जात्यादिः पादवृत्तान्तः स्वरितश्च स्वरास्त्रयः[12](?) ।

1 Read परयोरु:चो: ?

2 Ms. सखिँ यालन् पणीहतं.

3 RV 9. 97. 17 बन्धूँरिमाँ अवराँ इन्दो.

4 For ll. 223–225 cp. YŚ 216–217:
यादृशी रक्तवर्णाभा जपायाः कुसुमे ऽथ वा ।
तादृशं रञ्जयेद्वर्णं प्रान्ते नासिक्यमाचरेत् ॥
लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा ।
सर्वरङ्गं विजानीयाच्छत्रूनिति निदर्शनम् ॥

5 Cp. PŚ 29, YŚ 194.

6 Ll. 228–229 = PŚ 26 which has अभिभाषते in b.

7 Ms. लुप्तेपि.

8 Ms. आदिसर्वरंगमिति.

9 Ll. 230–231 = YŚ 218 with स्वारं for स्वरं and न चासीदिव विन्दति for d.

10 A line containing the names of the other three svaras has been dropped after this.

11 Ll. 234–237 = Svar. 13–14 (Sāmaśramin's ed. 11–12). For the last line it has पादवृत्तस्य विद्यात्तु ता अस्येति (Sāmaśramin क ईं वेद) निदर्शनम्.

12 स्वराश्रयः ?

उदात्तः पूर्वसन्धे[1](?) यो नीचैरभिपदे(?) स्थितः ॥
अनुदात्तः परः शेषः शाकलाद्यैः प्रचोदितः ।
तस्यैवोदात्तश्रवणं कम्पस्थाने ऽर्धमात्रकम्[2] ॥
कृत्रिमे(?) तु पदान्ताद्योर्बहुधा ऋत्तु भिद्यते ।
लोपागमविकारादि विशेषेण त्वृचि क्रमात् ॥
यत्र त्रिंशत् समाम्नातास्संयोग उपयोगिनः ।
वर्णा ऋग्वेद आचार्यैः स्पर्शान्तस्थोष्मभेदतः ॥[3]
त्रीणि त्रिषु त्रिधातूनि यत् किञ्चिदुपरि श्रुतम् ।
अन्तरिक्षं पुरीष्यं च एतद्विवृतलक्षणम् ॥
बहिःश्रितः पृथग्दशश्वृकद्दषिर्वृषबः बृहन्त्रिषु वर्षाण्येतत् संवृतलक्षणम् ॥
स्पर्शानां तु सह स्पर्शैः संयोगो यो भवेन्मिथः ।
पूर्वस्य संधृतिर्वक्त्रे न तु तस्योच्यते श्रुतिः ॥
परस्परं तु संयोगः स्पर्शानां संभवेद्यदि ।
तत्पूर्वस्य श्रुतिर्नास्ति विरामे व्यञ्जनस्य च ॥[5]
ककुद्मान् । यद् म्नन्[6] (5.31.7) भिनद्मीत्यत्र दार्णस्य(?) संधृतिः ॥
अग्निः । पलिक्नीः (5.2.4) श्वघ्नीव । ध्रिथंन्ते गकधात्तराः(?) ।
वाग्देवी । वाकपूता । विद्कुलाद् । विभ्राड् बृहद् (10.170.1) आरैक् पन्थाम् (1.113.16) ।
यद् म्नन् (5.31.7) त्रिष्टुब् गायत्र्य् (10.14.16) अर्वाक् ।
षळ् । अस्माद् । अनुष्टुब् इति निदर्शनम् ॥[8]
स्पर्शास्त्वपञ्चमाश्चैवं स्पर्शानां संभवेद्यदि(?)[10] ।

1 –सन्धौ ?

2 Cp. RPr. 3. 5 अनुदात्तः परः शेषः स उदात्तश्रुतिः.

3 Ll. 242–245 are repeated as ll. 303–306 below.

4 Line 248 is corrupt.

5 Ll. 251–252 appear as ll. 78–79 above.

6 Ms. यर्दम्नान्.

7 Ms. ध्री–.

8 Ms. अर्वांषळस्मदनुष्टबिति. As however these are examples of विराम-व्यञ्जन, it is easy to see that they end respectively in क्, द्, त्, प्; cp. line 81 above.

9 Ll. 255–257 appear as ll. 80–81 above.

10 b is evidently wrong. It appears to be a mistake for something like घोषवन्तः परा यदि.

स्वतृतीयानवाप्यन्ते (?) पञ्चमे पञ्चमस्तथा ॥
वर्गादिर्यत्पदान्तः स्यात् परयोश्चिचतुर्थयोः ।
स्वतृतीयमवाप्नोति अन्तस्थाभिश्च संयुतः ॥[1]
वर्गाणां प्रथमो वर्णः पञ्चमे सार्ववर्णिके ।
उदये पञ्चमस्थ(?)[2] स्यान्न चकारः पदान्तगः ॥[3]

अर्वाग् देवा (10.129.6) विभ्राड् बृहत् (10.170.1) बृहद्भिर्वाजैर् (6.1.11) त्रिष्टुब्भिः ।
अर्वाग्रथं (1.92.16) सम्राड् विभ्वीर् (1.188.5) गोमद् यूयम्[4] । उद्रेभश्च[5] ।
अर्वाङ् नरा (7.82.8) विराण्मित्रावरुणयोः (5.130.5) श्रमणोर्त[6] (2.30.7) ।
त्रिककुब्भिवर्वद् (1.121.4) इति चाप्यत्र तु निदर्शनम् ॥
पदान्तीयाश्च वर्गादेर्हकारो यः परो भवेत् ।
पूर्वस्यैव चतुर्थो यो हकारस्तं समाप्नुयात् ॥[7]
प्रथमं तु हकारश्च[8] तच्चतुर्थमवाप्यते[9] (?) ।
स्वतृतीयमवाप्नोति पूर्ववर्णस्तथा[10] हि सः ॥[11]

ऋधग्धुवेम (6.49.10) सम्राड्ढन्ता (4.21.10) कद्ध नूनं (1.38.1) त्रिष्टुब्भिताः ।
चकारो न पदान्तो ऽस्ति अतोऽसौ नोपदिश्यते ॥
मकारस्य पदान्तस्य रेफोष्मसु परेषु च ।
अनुस्वारो भवन्त्येव पदमध्यगतेष्वपि ॥[12]

त्वं रथं (1.54.6) तं हिन्वन्ति (9.53.4) त्वं शुक्रस्य (2.9.4) तां सु ते कीर्तिम् (10.54.1) ।
समानोदर्के षष्ठे ऽहनि । मांसमेकः पिंशति (1.161.10) ।
चक्षूंषि । मंहिष्ठो मत्सद् (4.31.2) एतदत्र निदर्शनम् ॥
स्ववर्गपञ्चमश्चैव स्पर्शेषु विषयेषु च ।

1 Cp. RPr. 4. 2.

2 पञ्चमश्च ?

3 RPr. 4. 3.

4 The nearest approach in RV is गोमद्यवमत् (8. 93. 3, 9. 69. 3).

5 RV 1. 118. 6 उद्रेभं दस्रा.

6 Ms. श्रमणोतं.

7 RPr. 4. 5.

8 Ms. -स्या.

9 अवाप्नुते would be grammatically right, but cp. अवाप्यन्ते in line 259 above.

10 ततो ?

11 Cp. however Uvaṭa on RPr. 4. 5.

12 Cp. RPr. 4. 15.

अन्तस्थासु च ता एव मकारस्य विधिः स्मृतः ॥[1]
अन्त्यस्थाने मकारो ऽयं पूर्वः स्पर्शे पदान्तगः ।
उदये तत्सवर्णः स्यात् सर्वस्मिन्ननुनासिकः[2] ॥

इदङ्कवेर् (2.28.1) इमाङ्खनामि (10.145.1) तङ् गीर्भिर् (1.143.4) नकिष्टङ्घ्न-
न्ति (2.27.83) ।

य ईञ्चकार (1.164.32) तञ्जानंस् (3.29.10) तन्त्वा (1.4.9) तान्देवास् । तान्धेनुम्
(4.42.10) ।

शन्नस् । त्वम्पवित्रे (9.86.30) वामम्बृहस्पते (1.190.5) विद्यम्भगम् (7.41.2)॥

अन्तस्थासु परास्वेवमन्तस्थां सानुनासिकाम् ।
रेफं विना सै[3]माप्नोति तामेव[4] या परा ततः ॥[5]

[6]यँ[यँ]युजम् (2.25.1-5) इमल्ँ[7] लोगन् (10.18.13) त[वँ]व[8] (6.48.14)
इति निदर्शनम् ॥

नकारो ऽपि लकारे तं लकारं सानुनासिकम् ।[9]
यो जिगीवाँ[10][लँ]लब्धमाददद् (2.12.4) इत्यत्र तु निदर्शनम् ॥
तकारस्तु पदान्तीयस्तावेव लजयोर्भवेत् ।[11]
अङ्गादङ्गाल्लोम्नोलोम्नः (10.163.6) यज्जातवेद (10.88.5) इति च ॥
ङनौ यौ तौ पदान्तीयौ हषकारे परे पदे ।
हषौ शुद्धौ ततो ब्रूयाच्छुद्धार्याकौ(?) ङनौ··· ॥

दध्यङ्ङ्ह (1.139.9) ऽर्वाङ्ङ्वामहे (1.177.2) देवान् हुवेम । महान् ह्यस्य (10.75.9) ।
वातान् ह्यश्वान् (5.58.7) दन् षंळ्दम् (10.99.6) इत्यत्र तु निदर्शनम् ॥

नकारोपधे[12] हकारो यत्र यत्र विभाव्यते ।
नकारश्रवणं कृत्वा हँकारं[13] संधयेत् पुनः ॥
नकारोपधे[14] षकारो यत्र यत्र च दृश्यते ।
नकारश्रवणं कृत्वा षकारं संधयेत् पुनः ॥

1 Cp. RPr. 4. 6, 7.
2 Ms. -कम्.
3 Ms. या-.
4 Ms. तावेव.
5 RPr. 4. 7.
6 Ms. यं.
7 Ms. इमं ल्.
8 Ms. तव.
9 RPr. 4. 8.
10 Ms. -वां.
11 RPr. 4. 10.
12 Ms. नकारोवको-.
13 Ms. ष-.
14 Ms. नकारे वष्ठ-.

ङ्[1]कारान्तं पदं पूर्वं हकारे परतः स्थिते ।
ङकारश्रवणं कृत्वा हकारं संधयेत् पुनः ॥[2]
कृत्रिमे(?)तु पदान्ताद्योः[3] बहुधा ऋक्षु[4] भिद्यते ।
लोपागमविकारादि विशेषेण त्वृचि क्रमात् ॥
यत्र त्रिंशत् समाम्नाताः संयोग उपजीविनः[5] ।
वर्णा ऋग्वेद आचार्यैः स्पर्शान्तस्थोष्मभेदतः ॥[6]
टकारान्तान्[7]नकारान्तात्सकारादि परं पदम् ।
तत्रान्तरे तथौ स्यातां विराट्त्सम्राड् (1.188.5) ससवान्त्सन् (3.22.1) ॥[8]
चञजेषु नकारस्य ञकारः प्रतिजायते ।[9]
मित्रेरुंश्चोदप्रवृक्णो (1.174.6) जहि शूर शत्रूञ्जामिम् (6.44.17) ॥
ङ्[10]कारान्तं पदं पूर्वं सकाराद्युत्तरं यदि ।
पतेत्तत्र ककारो ऽन्तः प्रत्यङ्[क्] स विश्वे(9.80.3)ति यथा ॥
ङशयोस्तु पदान्ताद्योः ककारस्त्वन्तरे भवेत् ।[11]
अर्वाङ्क् शश्वत्तमन् (3.35.6) नच्छत्वं पृथग्भावमिवोच्चरेत् ॥
पदाद्वर्गे[12]प्रथमान्ताद्यदि शादि परं पदम् ।
श[13]कारश्छ[14]त्वमाप्नोति[15] अर्वाक्छफाविव (2.39.3) तच्छंयोः (1.43.4) ।
विपाट्छुतुद्री (3.33.1) त्रिष्टुप्छेष इत्यत्र तु निदर्शनम् ॥
नकारान्तं पदं पूर्वं शकाराद्युत्तरं यदि ।
स नकारो ञकारः स्याच् चकारश्चा[16]न्तरा भवेत् ॥[17]
घ्नेवं वज्रिञ्[च्]छ्नथिह्यमित्रान् (1.63.5) इति निदर्शनम् ॥

1 Ms. न–.

2 Ll. 297–302 appear to be an amplification of ll. 293–294. Cp. ll. 306–319 for examples to the contrary before other ūṣmans.

3 Ms. –द्वोः.

4 Ms. वत्त.

5 L. 244 has उपयोगिनः for this word.

6 Ll. 303–306 appear as ll. 242–245 above.

7 Ms. –न्त–.

8 Cp. RPr. 4. 17 and line 96 above.

9 Cp. RPr. 4. 9.

10 Ms. न–.

11 Cp. RPr. 4. 16.

12 Ms. पदावगात् प्र–.

13 Ms. च–.

14 Ms. श्व–.

15 RPr. 4. 4.

16 Ms. चकारस्या–.

17 Cp. RPr. 4. 9, 12, 18.

पदान्तस्य विसर्गस्य शषसेषूदयेषु च ।
ततः[1] स्वङ्गित्वमाप्नोति प्रकृतिश्च विधीयते ॥
कखयोः परयो[र]स्य कचिदूष्मा भवेत्ततः ॥
ते तु पिण्डकृताः स्पर्शा ये कण्ठ्या(?)स्वरसंयुताः ।
सर्वेषां चोदाहरणं पूर्वोक्तं श्रूयतामिदम् ॥
यथा योक्त्रेण संवेष्ट्य तृणं बध्नन्ति वाहकाः ।
एवं वेष्ट्य यकारेण वैदिकं पिण्डमुच्यते ॥

वाध्र्यश्व (10.69.5,9,12) सुपित्र्य (10.115.6) वध्र्यश्वस्य (10.69.1) सुमित्र्याः (10.65.3) ।
रान्ध्या (6.23.6) त्र्यम्बकं (7.59.12) कृतान्यृजीषिणः[2] (8.32.1) सध्र्यग् । व्यृतूंर्ध्वं[3] ।
तौध्र्यः[4] । वध्र्यचीषम (10.22.2) पृष्ट्यृक्का (7.37.4) द्र्वन्नः[5] ।
अशत्र्व१र्यो (5.2.12) रात्र्युषसे (1.113.1) ऽस्यृषिकृत् (1.31.16) ।

जिह्वाग्रीयफलितमृकारद्वयसंयुतम् ।
एकीकृत्योच्चारणीयं निःसन्धि वर्त्तिवर्त्तुलम् ॥

प्रान्तर्ऋषयो (9.86.4) निर्ऋत्या (10.186.1) निर्ऋतिं । निर्ऋथं संचन्ताम् (7.104.14) ।
अग्निः [पूर्वेभिर्] ऋषिभिर् (1.1.2) आविर्ऋजीक (4.38.4) ऋतूंर्ऋतुपते (10.2.1) ।
गीर्भिर्ऋणो[मि] (8.24.6) दुर्हणायून् (1.84.16) जर्हृषाणो । जर्हृषन्त (6.17.4) ।
मतिर्हृदः[8] (3.39.1) पत्नीर्हृषितं (1.103.7) ज्योतिर्हृदयं च निदर्शनम् ॥

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
उच्चारणीयमौरस्यमेवमीप्सन्ति बह्वृचाः ॥[9]

ह्नादुनिं श्वैं (1.32.13) ह्वयाम्यग्निं (1.35.1) ह्लादिके ह्लादिकावति (10.16.14) ।
महान्ह्यस्य (10.75.9) ब्रह्मब्रह्मा (9.77.3) ऽह्नाह्ने (10.37.9) ति निदर्शनम् ॥

1 Read परः ?

2 Ms. कृत्सतान्यृ–. Cp. line 121 above.

3 RV 2. 38. 4 has व्यृ१तूँरदर्धः.

4 The vocative does not occur in RV.

5 Ms. –षमेष्ट्यृकाद्व्रन्नः.

6 पूर्वेभिः is misplaced in the ms. between निर्ऋतिं and निर्ऋथं instead of between अग्निः and ऋषिभिः in the next line.

7 Ms. –णायुजर्हृ–.

8 Ms. मिति हृदं.

9 Ll. 338-339 = PŚ 16, which has for cd औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥

10 Ms. –नी.

स्थानं कालो विकारश्च संवृतं विवृतागमौ ।
ईषत्स्पृष्टमघोषत्वं स्वरः कम्पस्तथोष्मता ॥
घोषानासिक्यनासिक्या वर्णधर्मास्तु देवताः ।
यावन्तो यत्र ये धर्मास्तावन्तस्तत्र तान् विदुः ॥
चतुर्मात्रस्तु षण्मात्रः प्रणवः कीर्त्यते बुधैः ।
पूर्वे स्वरो परो नादः सममात्रः प्रकीर्तितः ॥
अनुदात्तः स्वरो ज्ञेय उदात्तो नाद उच्यते ।
लक्षणं प्रणवस्येदं प्रणवो ब्रह्म कीर्त्यते ॥
तैलधारामिवाच्छिन्नां दीर्घघण्टानिनादवत् ।
अवाग्जं प्रणवस्याग्रं[1] यस्तं वेद स वेदवित् ॥
त्रिस्थानं च त्रिमात्रं च त्रिब्रह्म च[2] ऽयक्षरम् ।
त्रिमात्रादर्धमात्राच्च यस्तं वेद स वेदवित् ॥
वेदो हि वर्णसंघातो वेदो ब्रह्मेति कीर्त्यते ।
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ॥
छन्दः पादौ ज्योतिषं नेत्रयुग्मं
हस्तौ कल्पः श्रोत्रयुग्मं निरुक्तम् ।
शिक्षा घ्राणं व्याकरणं तथास्यं
वेदात्मने विष्णवे ऽस्मै नमो ऽस्तु ॥[3]
विष्णुं षडङ्गेन्द्रियमादिदेवं
वेदात्मानं पुरुषं विश्वरूपम् ।
संचिन्त्य देवं पठते द्विजो यः
स याति विष्णोः परमं पदं तत् ॥ ओम् ॥

इति शैशिरीयशिक्षा समाप्ता ॥

---

1 Ms. -ग्रा.
2 Cp. PŚ 41-42.
3 Ms. -श्च.